## वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु । (८/२१४३)

एकार्थः पदसमूहो वाक्यम् । वाक्यादेरामन्त्रितस्य द्वे भवतः असूयासम्मतिकोपकुत्सनभर्त्सनेषु[1] यदि तद् वाक्यं[2] भवति । तत्र परगुणानामसहनम् असूया । [3]पूजा सम्मतिः । कोपः क्रोधः । [4]निन्दनं कुत्सनम् । अपकारशब्दैर्भयोत्पादनं भर्त्सनम् । एते च प्रयोक्तृधर्माः, नाभिधेयधर्माः । असूयायाम् तावत् – माणवक ३ माणवक, अभिरूपक ३ अभिरूपक, रिक्तं ते आभिरूप्यम् । सम्मतौ – माणवक ३ माणवक, अभिरूपक ३ अभिरूपक, शोभनः खल्वसि । कोपे – माणवक ३ माणवक, अविनीतक ३ अविनीतक, इदानीं ज्ञास्यसि जाल्म । कुत्सने – शक्तिके ३ शक्तिके, [5]यष्टिके ३ यष्टिके, रिक्ता ते शक्तिः । भर्त्सने –चौर चौर ३, [6]वृषल वृषल ३, घातयिष्यमि त्वां बन्धयिष्यामि त्वाम् । असूयादिषु 'स्वरितात्रेडितेऽसूयासंमतिकोपकुत्सनेषु' (८.२.१०३/३६२२) इति पूर्वपदस्य प्लुतः । भर्त्सने तु 'आम्रेडितं भर्त्सने' (८.२.९५/३६१४) इत्याम्रेडितस्यैव प्लुतः । वाक्यादेः इति किम् ? अन्तस्य मध्यमस्य [7]च मा भूत्, शोभनः खल्वसि माणवक । आमन्त्रितस्य इति किम् ? उदारो देवदत्तः । असूयादिषु इति किम् ? देवदत्त गामभ्याज शुक्लाम्[8] ॥

## एकं बहुव्रीहिवत् । (९/२१४४)

एकम् इत्येतच्छब्दरूपं[9] द्विरुक्तं बहुव्रीहिवद् भवति । [10]बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ[11] । एकैकमक्षरं पठति । एकैकया आहुत्या जुहोति । सर्वनामसञ्ज्ञाप्रतिषेधस्वरसमासान्ताः समासाधिकारविहिते बहुव्रीहौ विज्ञायन्ते । तेनातिदेशिके बहुव्रीहौ न भवन्ति । एकैकस्मै[12] । 'न बहुव्रीहौ' (१. १. २९/२२२) इति [13]प्रतिषेधो न भवति, बहुव्रीहिरेव यो बहुव्रीहिः इति [14]विज्ञानात् । नन, सुसु, 'नञ्सुभ्याम्' (६. २. १७२/३९०६) इत्यन्तोदात्तत्वं न भवति । ऋक् ऋक्, पूः पूः, ऋक् पूः (५.४. ७४/९४०) इति समासान्तो न भवति ॥

## आबाधे च । (१०/२१४७)

आबाधनमाबाधः, पीडा प्रयोक्तृधर्मः, नाभिधेयधर्मः । तत्र वर्तमानस्य[15] द्वे भवतः, बहुव्रीहिवच्चास्य कार्यं भवति । गतगतः । [16]नष्टनष्टः । पतितपतितः । गतगता । नष्टनष्टा । पतितपतिता । प्रियस्य चिरगमनादिना पीड्यमानः [17]कश्चिदेवं प्रयुङ्क्ते प्रयोक्ता ॥

---

1. अर्थेषु इत्यधिकम् क. ड. ह. 2. एव इत्यधिकम् ब. 3. पूजनं ब. ड. इ. 4. निन्दा इ. 5. पशुके पशुके ड, नास्ति ब. 6. दस्यो दस्यो ड. इ. ह. 7. वा ड. 8. दण्डेन इत्यधिकम् क. ड. इ. ब, उपाध्यायस्ते पयः पास्यति इत्यधिकम् ह. 9. पूर्वेणैव इत्यधिकम् क. 10. द्विर्वचनमत्र नित्यवीप्सयोः इत्यनेन क. ड 11. यद्यपि बहुव्रीहौ इति नोच्यते तथापि तत्र दृष्टौ इत्यतिदिश्यते इत्यधिकम् क. ब. ड. 12. ददाति• इत्यधिकम् क. ब. ड. 13. सर्वनामसञ्ज्ञा इत्यधिकम् क. इ. ड. 14. विज्ञापयति ड, ज्ञापक.त् क. 15. द्वयमनेन वधीयते द्विर्वचनं बहुव्रीहिवद्भावः च क. 16. नष्टनष्टः नास्ति इ. 17. कश्चिदेवं नास्ति ह.